CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्सर्गमयूख

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द.न. १६१०१

अथोत्सर्गमयूखः प्रारभ्यते

मूल्य ५।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः॥उत्कादानविधिंनामराममाराध्यभास्करं॥उत्सर्गविषयेभट्टनीलकंठोवदत्यथ॥तत्रजलाशयोत्सर्गप्रशं
साविष्णुधर्मोत्तरे॥उदकेनविनातृप्तिर्नास्तिलोकद्वयेसदा॥तस्माज्जलाशयाःकार्याःपुरुषेणविपश्चिता॥यमः॥कूपारामप्रपा
कारीतथावृक्षावरोपकः॥कन्याप्रदःसेतुकारीस्वर्गंप्राप्नोत्यसंशयं॥तथा॥तडागेयस्यपानीयंसततंखलुतिष्ठति॥स्वर्गलोकेग
तिस्तस्यनात्रकार्याविचारणा॥नंदिपुराणे॥योवापीमथवाकूपंदेशेतोयविवर्जिते॥खानयेत्सनरोयातिस्वर्गंत्रेत्यशतंसमाः
॥विष्णुः॥कूपारामतडागेषुदेवतायतनेषुच॥पुनःसंस्कारकर्त्ताचलभतेमौलिकंफलं॥तथा॥सेतुबंधरत्नायेचनीर्थशौचरता
श्रये॥तडागकूपकर्त्तारोमुच्यन्तेतेतृषाभयात्॥नीर्थशौचंमलास्थिपंकाद्यपसारणं॥भविष्योत्तरे॥सर्वस्वेनापिकोतेयभूमि
स्थमुदकंकुरु॥कुलानितारयेत्कर्त्तायत्रगोर्वितृषाभवेत्॥अतःशुभगतंद्रव्यंतडागादिषुयोजयेत्॥धन्यःसपंथाविज्ञेय
स्तडागेवृक्षमंडिते॥पीत्वातोयंचमार्गेस्थाविश्रमंतिरमंतिच॥पानीयशोधनंकृत्वाह्रदेदेवविनिर्मिते॥प्रणालकरणात्तत्र
तृप्तिमाप्नोत्यनुक्रमं॥गृहादौकूपादिविशेषफलम्॥देवीपुराणे॥पूर्वामाश्रित्यकर्त्तव्यंतस्योत्तरपथेपिवा॥नपूर्वव्यत्ययंकुर्या
न्मठाद्देवालयाद्गृहात्॥कृतेभयप्रदंलोकेतथावास्याग्निजंभयं॥वायव्यमपिदेवस्यभयदंजायतेकृतं॥वराहमिहिरः॥पुष्टि
भूतिंपुत्रहानिंपुरंध्रीनाशंमृत्युंसंपदंशस्त्रबाधां॥किंचित्सौख्यंदिक्षुपूर्वादिकूपोत्कूपोमध्येगेहमर्थंस्वयंचेत्यादिजलाशयारं
भेकालोविष्णुधर्मोत्तरे॥स्थिरेलग्नेस्थिरांशेचकर्त्तुश्चोपचयान्विते॥तथा॥यस्यसोम्यग्रहाःकेंद्रेत्रिकोणेचापिभार्गवः॥पाप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चोपचयस्थानेतस्मिन्कार्यंनिवेशनं॥प्रासादेचैवमेतत्स्यात्कूपवापीषुचैवहीति॥केंद्रनामप्रथमचतुर्थसप्तदशमाख्यं॥त्रि
कोणंनवमंपंचमंच॥उपचयस्थानंत्रिषडेकादशदशमाख्यं॥वृक्षारोपणेपि॥वराहसंहितायां॥ध्रुवमृदुमूलविशाखागु
रुभंश्रवणतथाश्विनीहस्तं॥शस्तानिदिव्यदृग्भिःपादपसंरोपणेभानि॥गुरुभंपुष्यः॥जलाशयोत्सर्गकालोभविष्योत्तरे॥त
स्मिन्सलिलसंपूर्णेकार्त्तिकेचविशेषतः॥तडागस्यविधिःकार्यःस्थिरनक्षत्रयोगतः॥मुनयःकेचिदिच्छंतिह्यतीतेचोत्तराय
णे॥नकालनियमस्तत्रसलिलंतत्रकारणं॥दीपिकायां॥मार्त्तंडेंदूडुशुद्धौमुरजिदशयनेमाधवाव्हस्यशुक्लेमूलाषाढोत्तराश्वि
श्रवणगुरुकरेपौष्णशाक्राजचांद्रे॥मैत्रेब्राह्मेचपूर्णामदनरवितिथौसद्वितीयास्तृतीयाकार्यातोयप्रतिष्ठाज्ञगुरुसितदिनेका
लशुद्धौसुलग्ने॥मार्त्तंडःसूर्यः।इंदुश्चंद्रः।उडुनक्षत्रं॥एतेषांशुद्धिर्बलम्।मुरजिद्विष्णुः।तस्याशयनेअबोधे।गुरुःपुष्यः।करोहस्तः
पौष्णंरेवती॥शाक्रंज्येष्ठा।चांद्रंमृगः।मैत्रंअनुराधा।ब्राह्मंरोहिणी।पूर्णापंचमीदशम्यमापूर्णिमाः।मदनरवितिथीत्रयोदशीसप्त
म्यौ॥ज्ञोबुधः।सितःशुक्रः।वन्हिपुराणे॥संक्रांतिभेदेनफलविशेषउक्तः।वापीकूपतडागानांतस्मिन्कालेविधिःस्मृतः॥सुदिनेशुभ
नक्षत्रेप्रतिष्ठाशुभदास्मृता॥कर्कटेपुत्रलाभश्चसौख्यंतुमकरेभवेत्।मीनेपशोर्थलाभश्चकुंभेवसुबहूदकं॥वृषेचमिथुनेवृद्धि
र्वृश्चिकेचजलंभवेत्॥पितृतृप्तिस्तुकन्यायांतुलायांशाश्वतीगतिः॥सिंहोमेषोधनुर्गंधंजलस्यद्विजयच्छतीति॥अत्रायंसंग्रहो
वर्ज्यावर्ज्ययोः॥अधिकलुप्तसंवत्सरेसिंहमकरस्थबृहस्पतावस्तमितेबालेवृद्धेवागुरौशुक्रेतिचारिणिचगुरौगुर्वादित्येम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उ·म·
२

लमासेक्षयमासेलुप्तदिनद्वयवतिपक्षेऽवमदिनादौभूकंपाऽशन्युल्काद्यद्भुतदोषेचवर्ज्यः।उत्तरायणेमाघफाल्गुणचैत्रवैशा
खज्येष्ठाषाढान्यतममासेषुविशुद्धावयनद्वयविषुवद्वयकन्यामीनधनुरन्यतमसंक्रांतौशुक्लपक्षेद्वितीयातृतीयापंचमीस
प्तमीदशमीपौर्णमास्यमाऽन्यतमतिथौशनिमंगलान्यवारेषुभरणीकृत्तिकार्द्रापुनर्वस्वाश्लेषापूर्वाफाल्गुणीविशाखाव्यतिरि
क्तनक्षत्रेषुविष्कुंभातिगंडव्याघातवज्रव्यतिपातपरिघवैधृतिव्यतिरिक्तयोगेषुकर्त्तृचंद्रताराविशुद्धौबुधशुक्रगुरुसितपक्ष
चंद्रनिरीक्षितेलग्नेजलाशयोत्सर्गःकार्यइतिवह्नृचपरिशिष्टे।अथातोवारुणविधिर्वापीकूपतडागयज्ञंव्याख्यास्यामः।पुण्ये
तिथिकरणेशुभेनक्षत्रेप्राचींदिशमास्थायप्राक्प्रवणोदक्प्रवणोवोदकसमीपेग्निमुपसमाधायवारुणंचरुंश्रपयित्वाज्यभा
गांतंकृत्वाज्याहुतीर्जुहुयात्समुद्रज्येष्ठेतिप्रत्यृचंततोहविषोष्टाभिर्जुहुयात्तत्वायामिब्रह्मणावंदमानइतिपंचत्वन्नोअग्नेवरुण
स्यविद्वानितिचद्वेइमंमेवरुणश्रुधीतिचस्विष्टकृतंचनवमन्नववैप्राणाःप्राणावाआपस्तस्मादापोनवभिर्जुहोतिमार्गनांतेधेनुं
नयेत्अवतीर्यमानामनुमंत्रयेत्।इदंपवित्रंसलिलंकुरुष्वशुद्धाःपूताअमृतास्संतुनित्यंमांतारयंतीकुरुतीर्थाभिषेकंलोका
ल्लोकंतरतेतीर्यतेचेतिपुच्छेग्निस्वयंलग्नोन्वारब्धउत्तीर्यापोअस्मान्मातरःशुंधयंत्वित्यथापराजितायांदिश्युत्थापयेत्सूयव
साद्भगवतीहिभूयाइतिहिंकरोतिचेद्धिंकृण्वतीवसुपत्नीवसूनामितिसचैलकंठांकांचनशृंगींवृषप्रजांरौप्यखुरांकांस्योपदो
हनांविप्रायदद्यादितरांवाशक्त्यादक्षिणांततउत्सर्गंकुर्याद्देवपितृमनुष्याःप्रीयंतामितिपठित्वोत्सृजंतइत्याहशौनकोब्राह्मणा

राम
२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भोजयित्वास्वस्त्ययनं वाचयीत॥ इतिसंक्षिप्तोजलाशयोत्सर्गविधिः॥ विस्तरस्तुमात्स्ये॥ शृणुराजन्महाबाहोतडागादिषु योविधिः॥ पुराणेष्वितिहासेषुयंपठ्यतेचतथानृप॥ प्राप्यमुत्कृष्टमंपक्षंव्यतीतेचोत्तरायणे॥ पुण्येन्हिविप्रकथितंकृत्वाब्राह्मणवाचनं॥ प्रागुदक्प्रवणेदेशेतडागस्यसमीपगः॥ चतुर्हस्तोतथावेदीं चतुरस्रांचतुर्मुखां॥ चतुर्हस्तेतिमंडपत्रिभागव्याहृत्तिः॥ सिद्धान्नशेखरेतुतडागादिव्रतिष्ठायांपद्मिनीप्रसन्नोभेत्युक्तं॥ पद्मिनीनिवेदिनाम॥ तदुक्तंतत्रिचतुःपंचसप्तनवमैकादश्यन्यतमभागेनपूर्वमेवोक्तं॥ मंडपनिर्णये॥ तथाषोडशहस्तःस्यान्मंडपश्चचतुर्मुखः॥ यद्यपितडागस्यसमीपइत्यविशेषेणोक्तम्॥ तथापिमंडपादितडागात्प्राच्यामुदीच्यामीशान्यांप्रतीच्यांवाकार्यं॥ तडागात्पश्चिमेपूर्वेईशान्यामुत्तरेणिवा॥ आद्यैतुमंडपःकार्यःसर्वलक्षणसंयुतइतिवचनादितिसांप्रदायिकाः॥ अत्रविशेषोभविष्ये॥ तडागपालीशीर्षेतुमंडपंकारयेच्छुभमिति॥ वाह्याश्चपरितोगर्त्तारत्निमात्रास्त्रिमेखलाः॥ नवसप्तायवापंचयोनिवक्त्रानृपात्मज॥ गर्त्ताःकुंडानि॥ योनिरेववक्त्रंयेषांतेयोनिवक्त्राः॥ नवसप्तपक्षेईशानकोणस्थंमंडपंनकार्यंउपसेजातविरोधितयातद्बाधस्यैवन्याय्यत्वात्॥ चितस्तिमायोनिःस्यात्षट्सप्तांगुलविस्तृता॥ गर्त्ताश्चतत्रशस्ताःस्युस्त्रिपर्वोच्छ्रितमेखलाः॥ त्रिपर्वोच्छ्रितास्त्र्यंगुलंचोच्छ्रिताः॥ सर्वतश्चसवर्णाःस्युस्त्रिपर्वोच्छ्रितमेखलाः॥ सर्वतश्चसवर्णास्युःपताकाध्वजसंयुताः॥ सवर्णाइंद्रादिलोकपालाः॥ अश्वत्थोदुंबरप्लक्षवटशंखाभवानितु॥ मंडपस्यप्रतिदिशंद्वाराण्येतानिकारयेत्॥ द्वाराणितोरणानीतिकेचित्॥ यथाश्रुतमेवतुयुक्तंतदाचनोरणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यपि द्वारकाष्ठमयान्येतेषां द्वारांगत्वात्॥ शुभास्तत्राष्टहोतारो द्वारपालास्तथाऽष्टवै॥ अष्टौ तु जापकाः कार्या ब्राह्मणा वेदपारगाः॥ स
र्वलक्षणसंपन्ना दयावंतो जितेंद्रियाः॥ कुलशीलसमायुक्तः स्थापकस्याद्विजोत्तमः। स्थापको गुरुः॥ प्रतिगर्त्तं तु कलशान् यज्ञोपक
रणानि च॥ व्यजनं चामरं शुभ्रं ताम्रपात्रं सुविस्तरं॥ प्रतिगर्त्तमेकैकः कलश इति हेमाद्रिः। बहुवचनात्प्रतिगर्त्तपदाच्च। प्रतिकुंडं त्र
यस्त्रय इति तु सम्यक्॥ ततस्त्वनेकवर्णाः स्युर्वलयः प्रतिदैवतं॥ आचार्यः प्रक्षिपेद्भूमौ अनुमंत्र्य विचक्षणः॥ अरत्निमात्रो यूपः
स्यात्क्षीरवृक्षविनिर्मितः॥ यजमानप्रमाणो वा संस्थाप्यो भूतिमिच्छता॥ स वाष्टास्रश्च षालयुतः कार्यः। चषालचडापि एतत्प
रिमाणमध्य एव यूपे विशेषो भविष्ये॥ कदंबाश्वत्थपालाशवैकंकतमयः शुभः॥ शूद्रस्य यूपो निर्दिष्टः सारदारुमयो थवेति॥ त्रै
वर्णिकानां कदंबादिनियम एव शूद्रस्यानियम इत्यर्थः॥ तन्निखननस्थानं नारदीये॥ तडागोत्तरतश्चैव यूपस्थानं प्रकीर्त्तितमिति
पूर्वकुंडात्प्राच्यां पदमात्रांतरिते देशे इति रूपनारायणः॥ जलाशयमंडपांतराल इति केचित्॥ ईशानेषु निपानस्य न्यसेद्यूपं यथो
दितमिति परे एतत्पक्षत्रयमूलं विमृश्य कार्यं॥ हेमालंकरिणः कार्याः पंचविंशतिऋत्विजः॥ कुंडलानि च हैमानि केयूरकटकानि च
॥ तथांगुलीयचित्राणि वासांसि विविधानि च॥ पूजयेच्च समं सर्वान् आचार्यं द्विगुणं पुनः॥ दद्याद्यजनसंयुक्तमात्मनश्चापि यत्प्रि
यं॥ सौवर्णौ कूर्ममकरौ राजतौ मत्स्यडुंडुभौ॥ ताम्रौ कुलीरमंडूकौ आयसः शिशुमारकः॥ डुंडुभो राजिलः निर्विषसर्पः॥ कुलीरः
कर्कटः। कूर्मादयः सप्तवेद्यां वारुणमंडल आसाद्याः। एवमासाद्य तान् सर्वान् आदावेव विशेषतः॥ शुक्लमाल्यांबरधरः शुक्ल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गंधानुलेपनः॥सर्वौषध्युदकस्नानात्स्नापितोवेदपुंगवैः॥यजमानःसपत्नीकःपुत्रपौत्रसमन्वितः॥पश्चिमद्वारमाश्रित्यप्रवि
शेद्यागमंडपं॥ततोमंगलशब्देनभेरीणांनिःस्वनेनच॥रजसामंडलंकुर्यात्संचवर्णेनतत्त्ववित्॥षोडशारंततश्चक्रंपद्मगर्भंच
तुर्मुखं॥चतुरस्रंचपरितोवृत्तमध्येसुशोभनं॥वेद्याश्चोपरितःकुर्याद्ब्रह्मन्लोकपतीन्तथा॥विन्यसेन्मंत्रतःसर्वान्त्रतिदिक्षुवि
चक्षणः॥कव्यादीन्स्थापयेन्मध्येवारुणंमंत्रमाश्रितः॥ब्रह्माणंचशिवंविष्णुंतत्रैवस्थापयेद्बुधः॥विनायकंचविन्यस्यकमला
मंबिकांतथा॥शांत्यर्थंसर्वलोकानांभूतग्रामंन्यसेत्ततः॥पुष्पभक्षफलैर्युक्तंएवंकृत्वाधिवासयेत्॥कुंभाश्चरत्नगर्भास्तान्वा
सोभिरभिवेष्टयेत्॥गंधपुष्पैरलंकृत्यह्यारपालान्समंततः॥पठध्व-मितितान्ब्रूयादाचार्यस्त्वभिपूजयन्॥बह्वृचोपूर्वतः
स्थाप्यौदक्षिणेनुयजुर्विदौ॥सामगौपश्चिमेस्थाप्यावुत्तरेणत्वथर्वणौ॥उदङ्मुखौदक्षिणतोयजमानउपाविशेत्॥पठध्व
मितितान्सर्वान्होतृकान्पुनरेवतु॥उत्कृष्टंमंत्रजाप्येनतिष्ठध्वमितिजापकान्॥एवमादिश्यतान्सर्वान्प्रयुंज्याग्निंचमंत्र
वित्॥जुहुयाद्वारुणैर्मंत्रैराज्यंचसमिधस्तथा॥ऋत्विभ्यश्चैवहोतव्यावारुणैरेवसर्वशः॥ग्रहेभ्योविधिवद्धुत्वानथेंद्राये
श्चरायच॥मरुद्भ्योलोकपालेभ्योविधिवद्धिश्चकर्मणे॥रात्रिसूक्तंचरौद्रंचपावमानंसुमंगलं॥जपेरन्पौरुषंसूक्तंपूर्वतो बह्वृचाः
पृथक्॥शाक्रंरौद्रंचसौम्यंचकौष्मांडंजानवेदसं॥सौरसूक्तंजपेरंस्तेदक्षिणेनयजुर्विदः॥वैराजंपौरुषंसूक्तंसौपर्णरुद्रसंहि
ता॥शैशवंपंचनिधनंगायत्र्यंज्येष्ठसामच॥वामदेव्यंबृहत्सौम्यंरौरवंसरथंतरं॥गवांव्रतंविकर्णंचरक्षोघ्नंचयथाक्रमं॥गायं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिसामगाराजन्पश्चिमद्वारमाश्रिताः॥आथर्वणाश्चोत्तरस्तथाशांतिकपौष्टिकं॥तडागादिजप्यानिविशेषतःप्रयोगेदर्शयिष्यामः।
जपेरन्मनसादेवमाश्रितावरुणंसदा॥पूर्वेद्युरभितोरात्रावेवंकृत्वाधिवासनं॥गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात्॥मृ
दमानीयकुंभेषुप्रक्षिपेच्चत्वरांतथा॥रोचनंचैवसिद्धार्थान्गंधान्गुग्गुलमेवच॥स्नपनंतस्यकर्त्तव्यंपंचभंगसमन्वितैः॥भंगाः
पल्लवाः॥पूतंकर्त्तुर्महामंत्रैरेवंकृत्वाविधानतः॥स्नपनंचसूर्योदयात्प्राक्कार्यंतद्दिनकृत्यमाह॥एवंक्षपामतीवात्यविधिदृष्टे
नकर्मणा॥ततःप्रभातेविमलेसंजातेथगवांशतं॥ब्राह्मणेभ्यःप्रदातव्यमष्टषष्ट्यथवापुनः॥पंचाशद्वाथषट्त्रिंशत्संचविंश
तिवापुनरिति॥ततःसांवत्सरैःप्रोक्तेशुद्धलग्नेसुशोभने॥वेदशास्त्रैःसगांधर्वैर्वाद्यैश्चविविधैःशुभैः॥कनकालंकृतांकृत्वातत्र
गामवतारयेत्॥सांवत्सरादैवज्ञाः॥सामगायाप्यथर्वायब्राह्मणायविशांपते॥सामगःप्रकृतएवाग्रेपीत्यायात्॥जलाशयंच
त्रिवृतासूत्रेणपरिवेष्टयेत्॥पात्रीमादायसौवर्णींपंचरत्नसमन्वितां॥ततोनिक्षिप्यमकरंमत्स्यादींस्तांश्चसर्वतः॥धृतांचतु
र्भिर्विप्रैस्तुवेदवेदांगपारगैः॥महानदीजलोपेतैर्दध्यक्षतविभूषितैः॥उत्तराभिमुखोन्युब्जंजलमध्येतुकारयेत्॥आथर्व
णेनसाम्नातुपुनर्मामित्यृचाथवा॥आपोहिष्ठेतिमंत्रेणक्षिप्त्वागत्यचमंडपं॥आथर्वणंशन्नोदेवीरित्यस्यामृचिगीतं॥अत्र
विशेषोभविष्ये॥सामान्यंसर्वभूतेभ्योमयादत्तमिदंजलं॥रमंतुसर्वभूतानिस्नानपानावगाहनैः॥एवंजलंजलेक्षिप्त्वापूतयेजल
मातरः॥तोष्याःकर्मकराःसर्वेकुदालानिच॥पूजयित्वासदस्यांश्चव्रतंदद्यात्समंततः॥सदस्याऋत्विजः॥समंततोमंडपस्य॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनर्द्दिनानि होतव्यं चत्वारि मुनिसत्तमाः। होमस्तु पूर्वोक्त एव प्रत्यहमावर्त्तनीयः॥ चतुर्थीकर्म कर्त्तव्यं देया तत्रापि शक्तितः॥ द
क्षिणा राजशार्दूल वरुणं संस्मरंस्ततः॥ कृत्वा तु यज्ञपात्राणि यज्ञोपकरणानि च। ऋत्विग्भ्यस्तु समं दत्वा मंडपं विभजेत्पुनः॥ हे
मपात्रीं च शय्यां चेस्थापकाय निवेदयेत्॥ ततः सहस्रं विप्राणामथवाष्टशतं तथा॥ भोजयेत्तु यथाशक्ति पंचाशद्वाथ विंशतिं॥ एवमे
ष पुराणेषु तडागविधिरुच्यते॥ कूपवापीषु सर्वासु तथा पुष्करिणीषु च॥ एष एव विधिर्दृष्टः प्रतिष्ठासु तथैव च॥ सर्वासु वर्त्तुलचतु
रस्रादिषु। मंत्रतस्तु विशेषः स्यात्प्रसादोद्यानभूमिषु॥ प्रासादे वास्तुपुरुषः उद्याने वनस्पतिर्देवताः तन्मंत्रतो विशेष इत्यर्थः। एवं
त्वशक्तावर्द्धेन विधिर्दृष्टः स्वयंभुवा॥ अर्द्धमृत्विग्भ्यश्च विंशति तत्र होमजापकद्वारपालानां चतुष्टयं चतुष्टयं गुरुश्चैते त्रयोद
शेत्यर्थः॥ होमादिदक्षिणानामप्यर्धमिति केचित्॥ स्वल्पेष्वेकाग्निवत्कार्यं वित्तशाठ्यादृते नृभिः। प्रावृट्कालस्थितं तोयं अग्नि
ष्टोमसमं स्मृतं॥ शरत्काले स्थितं यत्स्यात्तदुदक्याप्रदायकं॥ वाजपेयातिरात्राभ्यां हेमंतशिशिरे स्थितं॥ अश्वमेधसमं प्राहुर्वे
संतसमये स्थितं॥ ग्रीष्मेपि यत्स्थितं तोयं राजसूयाद्विशिष्यते॥ एतान्महाराजविशेषधर्मान्करोति योथाः नघशुद्धबुद्धिः॥ स
याति रुद्रालयमाशु पूतः कल्पाननेकान्दिवि मोदते च॥ वानेकलोकान्समहस्तपादान्भुक्त्वा परार्द्धद्वयमंगनाभिः॥ सहैव वि
ष्णोः परमं पदं यत्प्रयाति तद्योगबलेन भूयः॥ इति जलाशयोत्सर्गविधिः॥ अथ जलाशयोत्सर्गप्रयोगः॥ अधिवासनदिनपूर्वदि
ने हुतहविष्यभोजनोधिवासनदिने पूर्वाण्हकालादि संकीर्त्य सकलपापक्षयपूर्वकपरार्द्धकालावच्छिन्नमहस्तपः प्रभृतिलोकांग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नासहिततल्लोकभोगोत्तरवैष्णवपरमपदप्राप्तिकामः श्वोमुकजलाशयोत्सर्गंकरिष्यइतिसंकल्प्यगणेशपूजास्वस्तिवाचनमातृव
सोर्द्धारापूजावृद्धिश्राद्धगुर्वर्त्विग्वरणानिसामान्यप्रयोगरीत्याकुर्यात्॥ तत्रर्त्विजश्चतुर्विंशतिः॥ अष्टौहोतारः अष्टौजापकाः अ
ष्टौद्वारपालाइतिचत्वारश्चत्वारोवाएतेगुरुश्चेतित्रयोदशवाइत्यशक्तावेकोगुरुरेववाततस्तान्मधुपर्केकटककुंडलमालाव
स्त्रादिनार्चयेत्॥ द्विगुणमूल्यकटकंकुंडलादिगुरवेदेयंततोमंडपप्रवेशवास्तुपूजामंडपपूजाग्निस्थापनोत्तरंगुरुर्वेदिलिखितवा
रुणमंडलमध्येपद्मेग्रहान्पूजयेत्तत्रकर्णिकायांवृत्तेमंडलेसूर्यंआग्नेयपत्रेचतुरस्रेसोमंदक्षिणेपत्रेभौमंईशानपत्रेवाणाका
रंबुधं॥ उत्तरेदीर्घंचतुरस्रंगुरुंपूर्वेपंचकोणेशुक्रं॥ पश्चिमेधनुषिशनिं॥ नैऋत्येशूर्पाकारंराहुं॥ वायव्येध्वजाकारंकेतुमिति॥
तत्तन्मंत्रैरधिदेवताप्रत्यधिदेवताविनायकादीन्यंचावाहयेत्तन्मंत्रास्तुसामान्यप्रयोगेनुसंधेयाः॥ ततोमंडलपूर्वादिदिक्कल
शेषुइंद्रादीनावाहयेत्॥ तथाहि॥ त्रातारमिंद्रं॥ एह्येहिसर्वामरसिद्धसंघैरभिष्टुतोवज्रधरामरेश॥ संवीज्यमानोप्सरसांगणे
नरक्षाध्वरंमेभगवन्नमस्ते॥ ॐ इंद्रेहागच्छेहतिष्ठेत्यावाह्य॥ गजस्कंधसमारूढंवज्रहस्तंमहाबलं॥ आवाहयामियज्ञेस्मि
न्पूजेयंप्रतिगृह्यतामितिपूजयेत्॥ एवमाग्नेयकलशेअग्निंदूतं॥ एह्येहिसर्वामरहव्यवाहमुनिप्रवीरैरभितोभिजुष्ट॥ तेजोवता
लोकगणेनसार्द्धंगृहाणपूजांभगवन्नमस्ते॥ अग्नेइहागच्छेहतिष्ठेत्यावाह्य॥ शक्तिहस्तंज्वलद्रूपंछागारूढंहविर्भुजं॥ आ
वाहयामीतिपूजयेत्॥ याम्यकुंभेयमायसोमं॥ एह्येहिवैवस्वतधर्मराजसर्वामरैरर्चितधर्ममूर्त्ते॥ शुभाशुभानंदशुचामधीशशि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वायनःपाहिमरुन्नमस्ते॥ॐयमेहागच्छेहनिष्ठेत्यावाह्य।महामहिषमारूढंदंडहस्तंमहाबलं॥आवाहयामीतिपूजयेत्॥वैं
ऋत्यकुंभेमोषुणःपरा॥एह्येहिरक्षोगणनायकस्त्वंविशालवेनालपिशाचसंघैः॥भव्याध्वरंपाहिप्रभाधिनाथलोकेश्वरंलोभग
वन्नमस्ते॥निऋतेइहागच्छेहनिष्ठेति आवाह्य।तीक्ष्णदंष्ट्रंशवारूढंखड्गहस्तंमहाबलं॥आवाहयामीतिपूजयेत्॥पश्चिमक
लशेनत्वायामि॥एह्येहियादोगणवारिधीशगणेनपर्जन्यसहाम्भरेभिः॥विद्याधरेन्द्रामरगीयमानपाहित्वमस्मान्भगवन्न
मस्ते॥वरुणेहागच्छेहनिष्ठेत्यावाह्य।मकरस्थंमहाबाहुंदेवदेवंमपांपतिं॥आवाहयामीतिपूजयेत्॥वायव्यकलशेनत्वायवृ
तस्यने॥एह्येहियज्ञेममरक्षणायमृगादिरूढःसहसिद्धसंघैः॥प्राणाधिपःकालकवेःसहायगृहाणपूजांभगवन्नमस्ते॥वायो
इहागच्छेहनिष्ठेत्यावाह्य।मृगस्कंधसमारूढंध्वजहस्तंमहाबलं॥आवाहयामीतिपूजयेत्॥उत्तरकुंभेआप्यायस्व।एह्ये
हियज्ञेश्वरयज्ञरक्षांविधत्स्वनक्षत्रगणेनसार्द्धं॥सर्वौषधीभिःपितृभिस्सहैवगृहाणपूजांभगवन्नमस्ते॥सोमेहागच्छेह
निष्ठेत्यावाह्य।दशाश्वरथमारूढंगदाहस्तंमहाबलं॥आवाहयामीतिपूजयेत्॥ऐशान्यकुंभेनमीशानं।एह्येहिविश्वेश्वरन
स्त्रिशूलकपालखट्वांगगणेनसार्द्धं॥लोकेशभूतेश्वरयज्ञसिद्धैगृहाणपूजांभगवन्नमस्ते॥ईशानेहागच्छेहनिष्ठेत्यावाह्य।वृष
स्कंधसमारूढंशूलहस्तंत्रिलोचनं॥आवाहयामीतिपूजयेत्॥निऋतिवरुणयोर्मध्यकुंभे।आयंगौःपृश्निः।एह्येहिपातालध
रामरेंद्रनागांगनाकिन्नरगीयमान।रक्षोगणेंद्रामरलोकसंघैरनन्तरक्षाध्वरमस्मदीयं।अनंतेहागच्छेहनिष्ठेत्यावाह्य।अशेषज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गदाधारंशेषंसुरगणार्चितं॥आवाहयामीतिपूजयेत्॥इंद्रैशानमध्यकुंभेब्रह्मजज्ञानं।एह्येहिसर्वाधिपतेसुरेंद्रलोकेनसार्द्धंपित
देवताभिः॥सर्वस्यधाताःस्थमितप्रभावोरक्षाध्वरंनःसनतंनमस्ते॥ब्रह्मन्निहागच्छेहतिष्ठेत्यावाह्य॥श्वेनहंसप्रमारूढपद्म
योनिंजगद्गुरुं॥आवाहयामीतिपूजयेत्॥अनंतब्रह्मणोःकलशाभावपक्षेअधऊर्ध्वदेशयोरावाहनं॥ततोमंडलमध्येपंचरत्न
सौवर्णकूर्ममकरराजतमत्स्यडुंडुभताम्रकुलीरमंडूकलोहशिशुमारयुतांसुवर्णपात्रीमिमंमेवरुणेतिमंत्रेणस्थापयित्वाब्र
ह्माणंशिवंविष्णुंगणपतिंश्रियंअंबिकांभूतयामंचतन्नमंत्रैरावाह्यपूजयेत्॥अथेंद्रादिपूजासमयेपौराणिकमंत्राः॥इंद्रःसु
रपतिःश्रेष्ठोवज्रहस्तोमहाबलः॥शक्तिहस्तोमहावीर्यस्तस्मैनित्यंनमोनमः॥सर्वतेजोधिपोदेवोरक्तवर्णोमहाबलः॥शक्ति
हस्तोमहावीर्यैवैश्वानरनमोस्तुते॥दंडहस्तःकृष्णवर्णोधर्माध्यक्षोमहाबलः॥प्रेताधिपतयेतुभ्यंयमराजायतेनमः॥सर्व
रक्षोधिपोदेवोनिर्ऋतिर्नीलविग्रहः॥महाखड्गधरोदेवस्तस्मैनित्यंनमोनमः॥नागपाशधरोनित्यंमकरस्थोदिवाकरः॥निमग्नः
शुक्लवर्णश्चनमोस्तुवरुणायते॥सर्वप्राणाधिपोनित्यंसर्वजंतुषुसंस्थितः॥ध्वजहस्तोमेघवर्णस्तस्मैनित्यंनमोनमः॥सर्वेन
सत्रमध्येयःसोमोसजाव्यवस्थितः॥शुक्लवर्णोगदाहस्तस्तस्मैनित्यंनमोनमः॥सर्वदेवाधिपोदेवईशानःशुक्लविग्रहः॥शू
लपाणिर्वृषारूढोरुद्राधिपतयेनमः॥पन्नगाधिपतिर्देवोयोनंतोनीलविग्रहः॥पातालवसतिर्नित्यमनंतायनमोनमः॥प राम
राशकुसुमाकारोब्रह्मःसर्वार्थसाधकः॥सर्वलोकपतिःश्रेष्ठस्तस्मैनित्यंनमोनमः॥१०॥इतितःसूर्यादिभूतयामांतपंचा ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शद्देवताभ्यस्तन्मंत्रांतेसूर्यायैषगुडोदनोबलिर्नमः॥ इत्यादिप्रयोगतोबलीन्दद्यात्तत्रसोमायघृतपायसंयमायमसूरान्नं
बुधायक्षीरोदनं॥ बृहस्पतयेदध्योदनं॥ शुक्रायघृतान्नं। शनयेकृशरान्नं। राहवेमांसौदनं॥ केतवेचित्रौदनं। अधिदेवताप्रत्यधि
देवताविनायकादिपंचभ्यःपायसबलिः॥ इंद्रादीनांदशानांमाषौदनबलिः॥ ततआचार्यःपूर्वकुंडात्पूर्ववत्पदत्रयंस्थलंत्यक्त्वा
हरिद्रातैलाभ्यांयूपमभ्यज्यतीर्थोदकेनस्नापयित्वागौरसर्षपगोरोचनागुग्गुलुदूर्वानिंबपत्रगर्भापोटलिकायदाबध्नंदाक्षा
यणाइतिमंत्रेणबध्वायुवासुवासाइतिवस्त्रेणवेष्ट्ययूपतृतीयांशेनाऽवटंखनित्वातत्राक्षतादिकंप्रक्षिप्यतत्रध्रुवोसीति
मंत्रेणयूपंनिखनेत्॥ ततःप्रतिकुंडसमीपेईशान्यांकलशस्थापनंकृत्वातत्रसर्वेसमुद्राइतितीर्थानिन्यस्यवरुणंपूजयेयुः।
ततआचार्यऋत्विजश्चस्वेस्वेकुंडेस्वगृह्योक्तमार्गेणाग्निप्रणयनानंतरंभाविकर्मकुर्युः॥ तत्रप्रतिकुंडमाचार्यकुंभप्रभृतिकुंडं
दक्षिणतोयजमानउपविश्यजलमादायास्मिन्कर्मणीदंहविःसूर्यसोमभौमबुधगुरुशुक्रशनिराहुकेतुग्रहेभ्यईश्वरोमास्कं
दविष्णुब्रह्मेंद्रयमकालचित्रगुप्ताधिदेवताभ्योग्न्यंबुभूमिविष्णुइंद्रेंद्राणीसर्पप्रजापतिब्रह्मप्रत्यधिदेवताभ्योविनायकदुर्गा
वाय्वाकाशाश्विपंचलोकपालेभ्यइंद्राग्नियमनिर्ऋतिवरुणवायुसोमेशानानंतब्रह्मदिक्पालेभ्योब्रह्मशिवविष्णुगणपति
श्रीअंबिकाभूतग्रामविश्वकर्मवरुणाग्निवायुसूर्यप्रजापतिस्विष्टकृदादिपूर्वोत्तरांगदेवताभ्योनममेतित्यजेत्॥ जापकैर्द्वार
पालैश्चशांतिजपादौक्रियमाणेहोमःकार्यः॥ अत्रद्वारपालजप्यमंत्राउच्यन्ते॥ श्रीसूक्तंपावमानंचसोमसूक्तंसुमंगलं॥ शांत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उ·म
७

ध्यायंचेंद्रसूक्तंरक्षोघ्नंचेतिवह्वृचौ॥ श्रीसूक्तंहिरण्यवर्णांहरिणीमित्यादिपंचदशर्चंपावमानंचसोमसूक्तंसुमंगलं॥ शांत्यध्या
यंचेंद्रसूक्तंरक्षोघ्नंत्वंसोमवव्रिकितइत्यादिगवित्यंतंत्रयोषिशत्यक्वसुमंगतेतकनिक्रददित्यादिशांतिकाध्यायः॥ शन्नइंद्रा
ग्नीत्यादिकंइंद्रसूक्तंयोजातएवेत्यादिकंरक्षोघ्नंकृणुष्वपाजइत्यादिदक्षिणेद्वारपालौरुद्रान्पुरुषसूक्तकं॥ श्लोकाध्यायंशुक्रि
यंचमंडलाध्यायमेवच॥ रुद्रान्नमस्तइत्यादिमंत्रान्श्लोकाध्यायदेवसवितुःप्रसुवयज्ञमित्यादिकंशुक्रियंऋचंवाचंप्रपद्यइत्या
दिकंमंडलाध्यायमादित्योवाएषयन्मंडलमितितैत्तिरीयेप्रसिद्धं॥ वामदेव्यंबृहत्सामज्येष्ठसामरथंतरं॥ तथापुरुषसूक्तंचरु
द्रसूक्तमतःपरं॥ आज्यदोहानिसामानिशांतिकाध्यायमेवच॥ भारुंडानिचसामानिपश्चिमेद्वारपालकौ॥ वामदेव्यंकयानः
श्चित्रमित्यस्यामृचिगीतं॥ बृहत्सामत्वामिद्धिहवामहइत्यस्यां॥ ज्येष्ठसाममूर्द्धानंदिवइत्यस्यां॥ रथंतरमभित्वाशूरनोनुमइ
त्यस्यां॥ पुरुषसूक्तंसहस्रशीर्षेत्यादिकासु॥ रुद्रसूक्तमावोराजानमितिवर्गद्वयं॥ आज्यदोहानिदेवव्रतानीत्यादिशांतिकाध्या
यः॥ अवोध्यग्निरित्यादि॥ भारुंडसामानिइमंस्तोममित्याद्यृक्षुगीतानि॥ आथर्वांगिरसंनीलरुद्रंचैवापराजितम्॥ देवींचमधु
सूक्तंचरोधसंशांतिकाह्वयं॥ अथर्वाणौद्वारपालौपठेतामुत्तराश्रितौ॥ आथर्वणसूक्तंछंदोगायहद्रापेत्यदिदआंगिरसमंगि
रसोजन्मानीत्यादिनीलरुद्रंयांरुद्रपत्यादित्यादिअपराजितादेवीपरिवत्मनीत्यादि॥ मधुसूक्तंमधुवाताऋतायतेत्यादि॥ रोध
संअभयंद्यावापृथिवीत्यादिशांतिकाध्यायः॥ शन्नइंद्राग्नीभवतामवोभिरित्यादि॥ जापकौतु॥ रात्रिसूक्तंचरौद्रंचपावमानंसु

राम
७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मंगलं॥ पौरुषं तु प्रैषदानाज्जपेतां बह्वृचौ पृथक्॥ रात्रिसूक्तं व्यख्यदायतान्यष्टर्चं रौद्रमिमा रुद्राय तवसे कपर्द्दिन इत्यादि॥ शाक्तं
रौद्रं च सौम्यं च कौष्मांडं जातवेदसं॥ सौर एति जपेतां द्वौ दक्षिणेन यजुर्विदौ॥ शाकमिंद्रवो विश्वतस्परीत्यादि मनुवाकं॥ रौद्र
मिमा रुद्राया स्विरधवने गिर इत्यादि षडृचं सौम्यं॥ सोमो धेनुमित्यादि षडृचं कौष्मांडं॥ यद्देवा देवहेडनमित्याद्यनुवाकं च
तुष्टयं जातवेदसं यस्त्वा रुद्रा कीरिशेत्यादि मनुवाकं॥ सौरं सूर्यो देवीमुखसंरोचमानेत्यादिकं षडृचं॥ वैराजं पौरुषं सूक्तं सौ
पर्णं रुद्रसंहिता॥ शैशवं पंचनिधनं गायत्रं ज्येष्ठसाम च॥ वामदेव्यं बृहत्सौम्यं रौरवं सरथंतरं॥ गवां व्रतं विकर्णं च रक्षोघ्नं
च यशस्तथा॥ गायेयुः सामगा राजन् पश्चिमद्वारमाश्रिताः॥ वैराजं पिबा सोममिंद्रमदंतु त्वेत्यादि॥ सौपर्णमुर्विदभिश्रु
तामघमित्यत्र त्रीणि सामानि॥ रुद्रसंहितामावो राजानमित्यादि॥ शैशवमुच्चा ते जातमंधस इत्यस्यां गीतं। पंचनिधनं
रहस्याद्गीतं गायत्रं तत्सवितुरित्यस्यां गीतं॥ ज्येष्ठसाममूर्द्धानं दिव इति प्रसिद्धं। वामदेव्यं कया नश्चित्रेत्यस्यां गीतं॥ बृहत्सा
मत्वामिद्धि हवामह इत्यादि प्रसिद्धं सौम्यं सोमव्रतं संतेपयांसीति। रौरवं पुनानः सोमेत्यत्र प्रसिद्धं॥ रथं[illegible]त्वा शूरनोनुमे
त्यस्यां गीतं। गवां व्रतं ते मन्वत प्रथमं अग्निमीडेत्येतया गीतं॥ विकर्णं विभ्राडित्यस्यां गीतं। रक्षोघ्नं अग्ने रक्षाणः अग्ने यक्ष्वाहीत्येत
या गीतं॥ यशः बृहदिंद्रायेत्यत्र गीतं॥ जपेतामप्यथर्वाणौ शांतिकं पौष्टिकं तथा॥ अंते वरुण सूक्तं च जपेयुः सर्व एव हि॥ शांतिकपौ
ष्टिकौ प्रसिद्धावाथर्वणानां॥ वारुणसूक्तं स्वस्वशाखीयं॥ तत्र ऋग्वेदिनां मोषु वरुण इति पंचानां वसिष्ठो वरुणो गायत्री अंत्यजग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीवरुणप्रीतयेजपेविनियोगः॥मोषुवरुणोरीरिषः॥यजुर्वेदिनांइमंमेवरुणेतिद्वयोःशुनःशेपोवरुणोगायत्रीत्रिष्टुभौवरुणप्रीत
येजपेविनियोगः॥सामगानांइमंमेपुष्कलोवरुणोगायत्रीवरुणः॥आथर्वणानांउदुत्तमंव्रलावरुणस्त्रिष्टुप्॰वरुणप्री॰प्रा॰
च्यादिकुंडेषुऋग्वेदिप्रभृतयोहोतारःप्रधानहोमात्प्राचीनंकर्मस्वस्वगृह्यानुसारिकत्वात्प्रधानहोमंकुर्युः॥तत्रऋग्वेदीताव
दाज्यभागानंतरंवारुणैर्मंत्रैरष्टोत्तरशतमाज्याहुतीस्तावतीराम्रौदुंबरसमिदाहुतीर्जुहुयात्॥मंत्रास्तुकीर्तयामिब्रह्मणात
दिनक्तंतद्दिवाशुनःशेपोह्यकृत्अवतेहेडो।उदुत्तमंवरुणत्वन्नोअग्नेवरुणस्य॰सत्वन्नोअग्ने॰इमंमेवरुणइति।अत्राद्यानां
चतुर्णांचतुर्द्दशवारमंत्यानांत्रयोदशवारमावृत्याष्टोत्तरशतसंख्यासंपत्तिरितिसांप्रदायिकाः॥ग्रहादिदेवताप्रत्यधिदेवताविनायकपंचकेंद्रशिवमरुदिंद्रादिब्रह्मांतदशलोकपालविश्वकर्मभ्यःप्रत्येकमष्टोत्तरसहस्राष्टोत्तरशताष्टाविंशतिअष्टान्यतम
संख्ययाजुहुयात्॥ग्रहेभ्योधिदेवतादीनांन्यूनसंख्ययाहोमइतिसंप्रदायः॥तद्ग्रहेभ्यस्तत्तत्समिधोन्येषांपालाश्यः॥आज्यंचसर्वे
भ्यःपृथक्एतन्मंत्रास्तुसामान्यप्रयोगोक्तक्रमेणइंद्रशिवमरुतान्त्रातारमिंद्रंगर्गस्त्रिष्टुप्।कद्रुद्रायघोरःकण्वःशिवोगायत्री
मरुतोयस्यराहूगणोमरुतोगायत्रीत्रिमंत्राः॥केचित्तु॥ब्रह्मशिवविष्णुगणपतिश्रीअंबिकाभूतग्रामाणामपितत्तन्मंत्रैर्होममा
हुः।तत्रश्रियोमंत्रः॥३गंधद्वाराअंबिकायाः।अंबेअंबिकेइतियाजुषः।भूतग्रामस्तुनाममंत्रएव॥ततःस्विष्टकृदाद्युत्तरांगतया
अयंचसर्वोपिवरुणंग्रहादिहोमोदिनचतुष्टयंप्रत्यहमावर्त्तनीयःस्विष्टकृदाद्युत्तरांगहोमस्तुचतुर्थदिनएवकार्यइतिकेचित्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्णाहुतिस्तु चतुर्थदिन एव असंभवे तद्दिन एव वा यजुःसामाथर्वविदामप्ययमेव होमक्रमः। मंत्रास्तु तेषामपि सामान्यप्रयोग एवोक्ताः वरुणमं
त्रास्तु यजुर्वेदिनां तावत् इमं मे त्यस्य शुनःशेपो गायत्री वरुणः वरुणप्रीतये आज्यहोमे उदुंबरसमिद्धोमे च विनियोगः॥१॥ ए
वं तत्वायामीति शुनःशेपस्त्रिष्टुब्वरुणः त्वन्नः सत्वन्न इत्येतयोर्वामदेवस्त्रिष्टुप् अग्नीवरुणौ देवते अयाश्चाग्ने सीति प्रजापतिः
पंक्तिरग्निः शेते शुनमिति शुनःशेपस्त्रिष्टुप् वरुणः आदित्यस्त्वक्कृष्णाजिनस्त्रिष्टुप् वरुणः वनेषु चीति कृष्णाजिनस्त्रिष्टुप् वरु
णः। उदुत्तमं शुनःशेपस्त्रिष्टुप् वरुणः वरुणस्योत्तंभनमभितपनो जगती वरुणः। निषसादेति प्रजापतिर्गायत्री वरुणः घृतव
तीभरद्वाजो जगती वरुणो ह्येतेषां द्वादशमंत्राणां नववारावृत्याष्टोत्तरशतसंख्यासंपत्तिः। ग्रहादिहोममंत्रास्तु सामान्यप्रयोग ए
वोक्ताः॥ ततो व्याहृतिहोमादीन्युत्तरांगानि सामगोपि व्याहृतिहोमांतानि पूर्वांगानि कृत्वा वारुणं होमं कुर्यात्॥ इमं मे पुष्कलो गा
यत्री वरुणः वरुणप्रीतये आज्यहोमे उदुंबरसमिद्धोमे च विनियोगः॥ एवमुत्तरत्रोद्देशत्यागो उदुत्तमं गौतमस्त्रिष्टुप् वरुणः घृतव
तीभरद्वाजो जगती वरुणः॥ एतेषां त्रयाणां मंत्राणां षड्विंशद्वारमावृत्याष्टोत्तरशतसंख्यासंपत्तिः ग्रहादिहोममंत्रास्तु सामान्यप्र
योग एवोक्ताः॥ तत उत्तरतंत्रं बर्हिर्होमांतं आथर्वणोषिसमंत्रकदात्रग्रहणप्रभृत्यभ्यातानहोमांतं कृत्वा वारुणं होमं कुर्यात्॥
अप्सु ते राजन्नित्यथर्वानुष्टुप् वरुणः। धाम्नो धाम्नो राजन्नित्यथर्वपंक्तिर्वरुणः। उदुत्तममथर्वत्रिष्टुप् वरुणः। एतेषां चतुर्णां मंत्राणां
सप्तविंशतिवारमावृत्याष्टोत्तरशतसंख्यासंपत्तिः ग्रहादिहोममंत्रास्तु सामान्यप्रयोग एवोक्ताः॥ ततः पुनरभ्यातानहोमाद्युत्तरतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उ॰म॰ ९

त्रं कुर्यात्॥ आचार्योपि स्वकुंडे स्वशाखोक्तविधिना एवमेवैताभ्यो देवताभ्यो जुहुयात्॥ एवं रात्रावधिवासनं निर्वर्त्याचार्यः कुंडाभ्या
सस्थापितकलशेषु गजस्थानाश्वस्थानरथ्यावल्मीकसरित्संगमह्रदगोकुलचत्वरसंबंधिनीरष्टौ मृदोश्वत्थादिवृक्षोद्भवान्पंच प
ल्लवान्कुंकुमकर्पूरकस्तूरिकासर्षपान्प्रक्षिपेत्॥ तैश्चोदकैर्यजमानं प्राङ्मुखं वा षध्यमुलिदं पुत्रपत्नीसहितमृत्विजमुदङ्मुखाः।
सूर्योदयात्प्रणुषसि पल्लवैरभिषिंचेयुः स्नापयेयुश्च मंत्रास्तु तत्तच्छाखीयाः पौराणाश्च सुरास्त्वामभिषिंचंत्वित्याद्याः सामान्यप्र
योग उक्ताः॥ ततो यजमानः शुक्लवेषः प्राङ्मुख उदङ्मुखेभ्यो गुर्वर्त्विग्भ्यो यथाशक्ति दक्षिणां दद्यात्॥ मंडपाद्बहिरीशान्यां दद्यादिति
रूपनारायणः मंडपमध्य एवेति मदनरत्नादयः॥ अत्र प्रयोगः॥ कुशतिलजलान्यादायाद्येहेत्यादि कर्त्तव्यामुकजलाशयोत्सर्गां
गभूतकृतैतदधिवासनप्रतिष्ठासिद्ध्यर्थं रुद्रदेवताः शतं गा अष्टषष्टिं पंचाशत् षड्विंशतं वा पंचविंशतिं वा युष्मभ्यं संप्रददे न ममेति
दद्यात्॥ ऋत्विजस्तु वरणक्रमेण गुरुहस्तं प्रथमं कृत्वा तदधोधः स्थापनीयावेव स्वस्तीत्युक्त्वा स्तुतिं वदेयुः। कर्मांगदेवताः प्रीयंता
मिति यजमानेनोक्ते सुप्रीता भवंत्विति वदेयुः ततो यजमानः सुलग्ने जलाशयजले कनकशृंगादिभूषितां गां यथाशक्ति संपूज्येरावती
धेनुमतीहि भूतं सूयवसिनीमनवेदशस्य॥ व्यस्कन्नारोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैरिति मंत्रेणावतारयेत्॥ तरं
तीतामनुमंत्रयेत्तत्र मंत्रः॥ इदं सलिलं पवित्रं कुरुष्व शुद्धाः पूता अमृताः संतु नित्यं मां तारयति सर्वतीर्थाभिषेकं लोकाल्लोकं तरते ती
र्यते इति वापीकूपोत्सर्गे तु गां त्रिरुपरि भ्रामयेदिति रूपनारायणीयादौ ततो गुरूणां वारब्धस्तत्पुच्छे लग्ने जलं गच्छंतं मंत्रद्वयं पठेत्

राम ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥तथा॥ समुद्रादूर्मिर्मधुमांउदारदुपांशुनासममृतत्वमानट्। घृतस्यनामगुह्यंयदस्तिजिह्वादेवानाममृतस्यनाभिः॥मुख्यागोःपु
च्छंगृहीत्वाजलेस्थित्वायजमानोगुरुणार्चितोयवकुशादिभिर्देवमनुष्यपितृतर्पणंस्वशाखीयंकुर्यात्॥अत्रात्मानंपितर्पण
श्लोकान्केचित्पठंतितेतुनिर्मूलत्वान्नलिखिताः॥ततःपुच्छंत्रिरुत्तरेणोत्थाप्यमुत्तरेतत्रमंत्राः॥आपोअस्मान्मातरःशुधयंतुघृ
तेननोघृतप्वःपुनंतु॥विश्वंहिरिप्रंप्रवहंतिदेवीरुदिदाभ्यःशुचिरापूतएमीति॥सूपवसाङ्गवतीहिभूयाअथोवयंभगवंतः
स्याम॥अद्भिस्तृणमध्येविश्वदानींपिवस्वहमुदकमाचरंतीमितामुत्यापयेत्पदिहिंकुर्यात्तदाहिंकृण्वतीवसुपत्नीवस्पृ
नांवत्समिच्छंतीमनसाभ्यागात्॥दुहामश्विभ्यांपयोअघ्न्येयंसावर्देनामहतेसौभगायेत्यनुमंत्रयेत॥ततःकृतवस्त्रपरिधानोय
जमानस्तांसंपूज्यसामगायत्रतिपादयेत्॥व्रतिपतित्वादेवनात्रदक्षिणा॥ततःकुंकुमाक्तेनविचृतासूत्रेणजलाशयंवेष्टयित्वात
त्समीपेउपविशेत्गुरुस्तत्रागासादितकूर्ममकरादियुतोहेमपात्रीपंचरत्नयुतांदध्यक्षतमहानदीजलयुतामादायोदङ्मुखैः
ऋत्विग्भिःसहस्वयंप्राङ्मुखःस्थित्वागोधनलेभौवर्णीकूर्ममकरौरागान्नेयभागयोःप्राङ्मुखौराजतौमत्स्यडुंडुभौदक्षिणनै
ऋत्यभागयोरुदङ्मुखौतान्त्रीकुलीरमंडूकौपश्चिमवायव्ययोःप्राङ्मुखौशायसंशिशुमारंउत्तरतोदक्षिणाभिमुखंवारुणैर्मंत्रैः
प्रक्षिपेत्॥ततःशन्नोदेवीरित्यस्यांगीतेनोथर्वणसाम्ना॥पुनर्मामैत्विन्द्रियंपुनरायुःपुनर्भगः॥पुनर्द्रविणमेतुमापुनर्ब्राह्मणमेतुमे
सरण्यगानम्नापोहिष्ठेतिऋचेनवोदङ्मुखस्तांपात्रींन्युब्जीकुर्यात्॥ततःसऋत्विगुरुश्चामेत॥ततोयजमानःप्राङ्मुखोजले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्सर्गं कुर्यात्॥ तत्र कुशजलयवतिलानादाय देशकालसंकीर्त्तनांते पापक्षयपूर्वकरुद्रालयगमनानन्तरं बहुकल्पकालाकालावधिकद्यु
लोकभोगानुभवपूर्वकपरार्द्धद्वयकालावच्छिन्नमहस्तपःप्रभृतिलोकांगनासहिततल्लोकभोगोत्तरकालसद्योगबलप्राप्यवैष्ण
वपदप्राप्तिकामोहं इमं तडागादिजलाशयवरुणदेवताकं स्नानपानावगाहनाद्यर्थं सर्वभूतेभ्य उत्सृजे॥ इत्युक्त्वा जलाशयं नि
रीक्ष्य जलं भूमौ निक्षिपेत्॥ ततो मंत्रद्वयं जपेत्॥ सर्वभूतेभ्य उत्सृष्टं मयैतज्जलमूर्जितं॥ रमंतु सर्वभूतानि स्नानपानावगाहनैः
॥ सामान्यं सर्वभूतानां मया दत्तमिदं जलं॥ रमंतु सर्वभूतानि स्नानपानावगाहनैरिति। ततो गुरुर्मंडपस्य प्रागादिष्विंद्रादिभ्यः पू
र्ववन्माषभक्तबलिं दद्यात्॥ अथाचारप्राप्तं नागयष्ट्यारोपणं तत्र गुरुरष्टसु कंकतपत्रेष्वनंतवासुकितक्षककर्कोटकपद्मशंख
महापद्मकुलिकनामानि प्रत्येकं लिखित्वा प्राक्स्थापितसजलकलशे प्रक्षिप्यालोक्य तत्र वरुणं पूजयित्वा॥ एकं चूतपत्रमा
कृष्य तत्र लिखितनामानं नागं तीर्थजलाप्लुतायां यज्ञियवृक्षोद्भवायां जलाशयाल्पत्वाद्यनुसारतो द्वादशपंचदशविंशत्य
न्यतमारत्निमितायां यष्ट्यां अमुकनागेहागच्छेह तिष्ठेत्यावाह्य स्थापयित्वा तेन नागेनास्य जलाशयस्य रक्षा कार्येति जनेभ्यः
श्रावयित्वा तन्नागयष्ट्याममुकनागाय नम इति नाममंत्रेण यथाशक्ति पूजयेत्॥ यष्टिसंबंधिवर्तुलमस्तकोपरि शूले लोहम
यं चक्रमारोपयंति॥ ततो जलमध्ये प्रागेव यष्ट्यर्थकृतखातसमये र्चितां यष्टिं नयेत्॥ ततः खाते दधिमध्वक्षतकुशतीर्थजलपंच
रत्नानि प्रक्षिप्य ध्रुवा द्यौरिति मंत्रेण यष्टिं समारोपयेत्॥ इदं च यष्ट्यारोपणं कूपवाप्योर्न कार्यमिति रूपनारायणीये॥ ततो यजमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नोगंगादितीर्थजलंजलाशयेप्रक्षिप्यप्राङ्मुखउपविश्यपठेत्॥कुरुक्षेत्रंगयागंगाप्रभासःपुष्कराणिच॥एतानिपंचतीर्थानि
तडागेनिवसंतुमे॥वितस्ताकौशिकीसिंधुःसरयूश्चसरस्वती॥एतानिपंचतीर्थानि०॥इरावतीपुरलासिंधुरयावर्त्तादृषद्वती॥ए
तानिपंच०॥यमुनानर्मदारेवाचंद्रभागाचवेदिका॥एतानि०॥गोमतीवाङ्मतीशोणोगंडकीसागरस्तथा॥एतानि०॥इतिपठित्वा
जलंस्पृष्ट्वा॥आपोहिष्ठेतितत्रंजपन्नविच्छिन्नदुग्धधारयाजलाशयंत्रिःप्रदक्षिणीकुर्यात्॥एकंब्राह्मणंयथेष्टंदुग्धंपाययेत्॥
ततोगुरुर्दिनत्रयंस्थापितदेवतानांपूजनंकृत्वाऋत्विग्भ्यःसहस्वेस्वेकुंडेवारुणप्रभृतिविम्बकर्मांतंहोमंकुर्यात्॥नदेनेतंउत्तरां
गंनिर्वर्त्यस्वस्वकुंडेषुसर्वेपूर्णाहुतिंहोमंकुर्युः॥असंभवेत्वधिवासनदिवसएवपूर्णाहुतिरितिवदंतिततोवह्निपूजनन्यायुष्क
रणादिकर्मशेषंयथायथंकुर्युः॥दरिद्रोयजमानएकाग्निविधानेनगुरुणैवसर्वंकारयेदितिमदनरत्नाद्यः॥अथचतुर्थीकर्म॥त
त्रगुरुःस्थंडिलंयद्देवादेवेहेडनमितिद्वाभ्यांपरिसमुह्य॥मानस्तोकइत्युपलिप्य॥तांरत्रेषिंद्रप्रत्यतिंनरस्तोकाष्टास्वर्वतइत्यु
ल्लिख्य॥सदसस्पतिमित्यगुष्ठानामिकाभ्यांरेखामदमुद्धृत्य॥त्वामिद्धिहवामहेसातौवाजस्यकारवइत्यभ्युस्याग्निर्मूर्द्धेतिवरु
णमग्निंप्रतिष्ठापयेत्॥हिरण्यगर्भइतिदक्षिणेब्रह्मासनमास्तीर्यब्रह्मजज्ञानमितिनत्वब्रह्मापामुपवेश्यापोहिष्ठेतिकुशैःपरिषणी
तापात्रंसजलंस्थापयित्वा॥अजिघ्रकलशंत्रिरितिईशान्यांकलशंनिधायतत्रजलेवरुणंसंपूज्य॥कायानश्चित्रइत्यग्निंपरिस्तीर्य॥
गायत्रेणत्वाछंदसासादयामीतिपात्राणियथोपयोगमासाद्य॥विष्णोरराटमसीतिपवित्रंछित्त्वाप्रोक्षणीरासादयेतिप्रोक्षणीस्तादकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत्वोत्पूयवामहस्तेकृत्वादक्षिणेनोदिंगनंकृत्वाअर्थवत्प्रोक्ष्यासंचरेत्प्रोक्षणीपात्रंनिधायस्थाल्यामाज्यमासिच्येषेत्वोर्ज्जेत्वेत्यवे
क्ष्य॥अग्निंदूतंपुरोदधइतिपर्य्यग्निंकृत्वात्रातारमिंद्रमितिस्रुचंप्रताप्य।अनिशितोसीतिसंसर्गकुशैःसंमार्ज्य।प्रत्युष्टंरक्षःप्र
त्युष्टाअरातयइतिपुनःप्रताप्यबर्हिषिनिधायोत्तिष्ठब्रह्मणस्पतइत्याज्यमुद्वास्यसवितुष्ट्वेत्युत्पूयोर्ज्जेत्वेत्यवेक्ष्यप्रोक्षणीरप्यु
त्पूयपयस्यास्तेघोरआसमित्युपयमनकुशानादाय।समिधाग्निमितिसमिधोभ्याधायविश्वतश्चक्षुरित्यग्निंप्रज्वाल्यतदेवाग्नि
स्तदादित्याग्निंसंपूज्यदेवसवितुरितिप्रोक्षणीजलेनाग्निंपर्युक्ष्यप्रणीतासुपवित्रंकृत्वादक्षिणांतान्वाप्रजुहुयात्॥ॐप्रजापत
येस्वाहा॥इंद्रायस्वाहा॥अग्नयेस्वाहा॥सोमायस्वाहा॥भूर्भुवःस्वःस्वाहा।त्वन्नोअग्नेसत्वन्नोअग्ने।अयाश्चाग्ने।येतेशतं।उ
दुत्तमंइतिप्रायश्चित्तंहुत्वाततस्तिसृभिर्व्याहृतिभिर्वन्हिंहुत्वा।इमंमेवरुणेतिमंत्रेणफडन्तेनतोयमभिमंत्र्यतेनाग्निमभ्युक्ष्य।गा
यत्र्यासवितृपंचदशाहुतीर्हुत्वाइमंमेवरुणेतिवरुणायशतमाज्याहुतीर्जुहुयात्॥भूयोपिव्याहृतित्रयेणहुत्वाऽग्नयेस्विष्ट
कृतेस्वाहेतिजुहुयात्॥इमंमेवरुणेतिपूर्णाहुतिहोमः॥ततोग्निविसर्जनं॥ततोगुर्वर्त्विग्भ्योहिरण्यंदद्यात्॥यजमानकर्तृकं
पूजनग्रहादानंयांतुदेवगणाइतिदेवताविसर्ज्जयेत्॥ततोब्राह्मणसहस्रमष्टोत्तरशतंपंचाशतंविंशतिंवाशक्त्यनुरूपंभोज
यित्वा।यस्यस्मृत्या।प्रमादात्कुर्वतांकर्मेत्युक्त्वात्रिर्विष्णुंस्मरेत्॥इतितडागोत्सर्गविधिः॥अथवापीकूपोत्सर्गः।भविष्योत्तरे
॥वापीकूपविधानंचकथयामितवापरं॥कुंडमंडपसंभारभूषणाच्छादनादिकं॥तडागविधिवत्कुर्याद्यूपगोतरणादिकं॥अप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्मूलान्कलशान्वापीठूलेषुदापयेत्॥तीर्थोदकसंप्रयुक्तान्मितचंदनचर्चितान्॥सितवस्त्रयुगच्छन्नान्समाल्यान्रत्न
गर्भिणः॥अर्पित्वावरुणंतत्रयावमग्नौयथाविधि॥यावंयावमयं॥चतस्रस्त्वाहुनीर्हुत्वाभूर्भुवस्त्वरितिक्रमात्॥व्यस्ता
समस्ताश्चेतिचतस्रः॥ग्रहहोमंप्रकुर्वीतशांतिपुष्टिविवर्द्धनं॥वरुणायबलिंदद्यालोकपालेभ्यएवच॥वारुणानिचसूक्ता
निजपेयुर्द्विजपुंगवाः॥वेदिमध्येमंडलंकंपद्मगर्भंप्रकल्पयेत्॥तन्मध्येपूजयेच्छंभुंब्रह्माणंकेशवंतथा॥मत्स्यंकच्छपमंडू
कान्वेदिमध्येधिवासयेत्॥मित्रंशस्त्रभिभूतानांधनदोधनकांक्षिणां॥वैद्योरोगाभिभूतानांशरणंशरणार्थिनां॥अनेनैव
चमंत्रेण वरुणायविसर्जयेत्॥आद्यावावाहयेद्देवमनेनैवविशेषतः॥नमस्तेविश्वगुप्तायनमोविष्णोअपांपते॥सान्नि
ध्यंकुरुदेवेशसमुद्रादिहयत्यच॥ततस्तुदक्षिणांदद्याद्ब्राह्मणेभ्योविशेषतः॥गोःस्थापकायदातव्याभोजनंचातिवारितं
सर्वेषामेवदातव्यमेषपौराणिकोविधिः॥अत्रविशेषः॥प्रतिकुंडकलशस्थापनसमयेवाप्यादिचतुर्द्दिक्षुधान्योपरिस्थिनव
स्त्रयुगछन्नान्त्रकलशान्स्थापयित्वा॥तेषुतीर्थमावाह्यनमस्तेविश्वगुप्तायेतितेषुविष्णुमावाह्यपूजयेत्॥तते
ग्रहवेद्यांषोडशारेग्रहलोकपालादिस्थापनानंतरंमध्येशंभुंब्रह्माणंकेशवंचावाह्य॥तत्रैवसौवर्णंकूर्मंरौप्यंमत्स्यंत्रपुमयं
मंडूकंपंचरत्नतीर्थजलादियुतायांताम्रपात्र्यांअधिवास्यप्रतिष्ठाप्यसंपूज्यतडागवद्दलिदानंयूपनिखननंचकृत्वाय्था
शास्त्रंचयवमयंचरुंश्रपयित्वाज्यभागान्तव्यस्तसमस्तव्याहृतिभिश्चतस्रआज्याहुतीर्हुत्वातडागोत्सर्गवद्वारुणमंत्रैर्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वचरूदुंबरसमिदाज्यानांप्रत्येकमष्टोत्तरशतमाज्याहुतीर्हुत्वाग्रहादिविश्वकर्मांतानांप्रत्येकमष्टाविंशतिंसमिदाज्याहुतीर्जु
हुयात्॥ ततोवरुणलोकपालादिभ्योबलीन्दद्यात्समंताद्गांचभ्रामयेत्॥ इदंसलिलमितिमंत्रपाठः॥ ततःकूर्मादियुतांताम्र
पात्रीमादायेमंमेवरुणेतिजलेप्रक्षिपेत्॥ ततउत्सर्गः॥ भ्रामणार्थांगांगुरवेदद्यात्॥ अन्यत्सर्वंमत्स्यपुराणीयजलोत्सर्गा
विधिवत्॥ इदंचावश्यकं॥ येनकामयतेशांतिंवापीकूपादिकेत्विमां॥ तस्यतन्निष्फलंतोयमुप्तंबीजमिवोखरे॥ वापीकूप
तडागेषुसंस्थितंप्रथमंजलं॥ अपेयंतुभवेत्सर्वंतज्जलंसूतिकासममितिनिंदावगमात्॥ उत्सृष्टवज्जलंत्यक्त्वाग्नेयादिपु
रोडाशवत्स्वयंनोपयोज्यमितिकेचित्॥ अत्रसीसप्राणिनामुत्सर्गेउद्देश्यत्वात्स्वस्यापितदंतर्गतेर्वागेवदेवतायाएवोद्देश्यत्वा
त्स्वयंतदभावेनरागवैषम्यात्स्वयमप्युपयोज्यमित्यन्ये॥ एवमारामफलादिष्वपिइतिभविष्येमयोक्तोवापीकूपतडागोत्स
र्गविधिः॥ अथवापीकूपतडागविषयेऽल्पतोयेषुश्वमार्जारखरवानरशूकरादिमृतकाद्युपघातेसर्वोदकोद्धरणेनशुद्धिः॥
वहुजलेकुंभशतमुद्धृत्यपंचगव्यप्रोक्षणं॥ क्षुद्रप्रणिपातेषष्ठिकुंभोद्धारेपंचगव्यप्रक्षेपः॥ अत्यल्पोपघातेसूर्यचंद्ररश्मिसंबं
धाद्वायुस्पर्शाद्वाशुद्धिः॥ तथा॥ अतिगंभीरवापीकूपतडागनद्यादिषुचांडालाद्यशुचिस्पर्शेयत्रैवस्थलेतत्स्पर्शस्तदेवस्थलं
परिवर्ज्यान्यत्रशुद्धिः॥ वापीकूपतडागेषुमानुषमृतकेप्रक्षिप्तेसर्वजलोद्धाराद्घटशतजलोद्धरणपूर्वकपंचगव्यप्रक्षेपाद्वा
शुद्धिः॥ वापीकूपतडागजलेमनुष्यमरणेतुजलस्याहोरात्रमाशौचं॥ ततःप्रागुक्ताशुद्धिःएवंमूत्रपुरीषचर्मरुधिरादिधातुप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षेपे त्रिंशत्कुंभजलोद्धारपूर्वकगोमूत्रादिप्रक्षेपादिकमार्जनमिति वाप्यादिशुद्धिः। एतन्मूलवचनानि पितामहचरणकृतायां पद्धतौ द्रष्टव्यानि।
अथारामप्रतिष्ठां वक्तुं वृक्षारोपणमुक्तं। भविष्यत्पुराणे॥ अश्वत्थमेकं पिचुमंदमेकं न्यग्रोधमेकं दशतिंतिणीश्च। कपित्थबिल्वामलक
त्रयं च पंचाम्रवापी नरकं न पश्येत्। पाद्मे। यत्नेनापि च राजेंद्र पिप्पलारोपणं कुरु। स तु पुत्रसहस्राणामेक एव भविष्यति। कर्त्तव्यमिति शे
षः॥ महाभारते॥ कीर्त्तिश्च मानुषे लोके प्रेत्य चैव शुभं फलं। अतीताः नागतौ चोभौ पितृवंश्यौ च भारत। तारयेद्वृक्षरोपी च तस्माद्वृक्षांश्च रो
पयेदित्यादि। मात्स्ये। पादपानां विधिं वक्ष्ये तथैवोद्यानभूमिषु॥ तडागविधिवत्सर्वमासाद्य जगदीश्वर॥ ऋत्विङ्मंडपसंभारभूषणाच्छा
दनादिकं। आचार्यश्चापि तादृशः॥ पूजयेद्ब्राह्मणांस्तद्वद्धेमवस्त्रानुलेपनैः॥ सर्वौषध्युदकैः सिक्तान् पिष्टातकविभूषितान्। पिष्टातकं सु
गंधिचूर्णं॥ वृक्षान्माल्यैरलंकृत्य वासोभिरभिवेष्टयेत्॥ सूच्या सौवर्णया कार्यं सर्वेषां मर्मवेधनं। अंजनं चापि दातव्यं तद्वद्धेमशलाकया
। फलानि सप्त वाष्टौ वा कालधौतानि कारयेत्॥ कालधौतानि सौवर्णानि। प्रत्येकं सर्ववृक्षाणां वेधांतान्यधिवासयेत्। धूपोत्र गुग्गुलश्रेष्ठ
ताम्रपात्रैरधिष्ठितान्। सप्तधान्ययुतान्कृत्वा वस्त्रगंधानुलेपनैः। कुंभान्सर्वेषु वृक्षेषु स्थापयित्वा नरोत्तम। सहिरण्यानशेषांस्तान्कृत्वा व
लिनिवेदनं। यथावल्लोकपालानामिंद्रादीनां विधानतः। वनस्पतेश्च विद्वद्भिर्होमः कार्यो द्विजातिभिः। ततः शुक्लांबरधरां सौवर्णकृत
भूषणां॥ सकांस्यदोहां सौवर्णशृंगाभ्यामतिशालिनीं। पयस्विनीं वृक्षमध्यामुत्सृजेद्गामुदङ्मुखीं। ततोऽभिषेकमंत्रेण वाद्यमंगलगी
तकैः। ऋग्यजुःसाममंत्रैश्च वारुणैरभितस्तथा॥ तैरेव कुंभैः स्नपनं कुर्युर्ब्राह्मणपुंगवाः। ततः शुक्लांबरधरो यजमानोभिपूजयेत्॥ गोभि
र्विभवतः सर्वानृत्विगाद्यान्समाहितः। हेमसूत्रैस्सकटकैरंगुलीयैः पवित्रकैः। वासोभिः शयनीयैश्च तथोपस्करपादुकैः। क्षीराभिषेचनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुर्याद्यावद्दिनचतुष्टयं। होमश्च सर्पिषा कार्यो यवैः कृष्णतिलैस्तथा। पालाश्यः समिधः शस्ताश्चतुर्थेन्हि तथोत्सवः। दक्षिणापि पुनस्तद्वद्देया
शक्त्यापि तत्र सः। आचार्यं द्विगुणं दत्वा प्रणिपत्य विसर्जयेत्॥ अनेन विधिना यस्तु कुर्याद्वृक्षोत्सवं बुधः। सर्वान्कामानवाप्नोति फलं चानंत
मश्नुत इत्यादि। अत्र जलाशयवदारामोप्युत्सृष्टव्य इति केचित्। मानावान्येत्यन्ये॥ अथैतत्प्रयोगः। तत्र जलाशयोत्सर्गोक्तकालमनुसृत्या
धिवासनदिनात्पूर्वेद्युः कृतैकभक्तादिनियमोधिवासनदिने प्राङ्मुख उपविश्य अद्येहेत्यादि मम सर्वपापक्षयातीताऽनागतपितृकुलतारण
कामो भगवत्प्रीतिकामोधिवादिरामोत्सर्गं करिष्य इति संकल्प्य गणेशपूजास्वस्तिवाचनमातृपूजाभ्युदयिकश्राद्धगुर्वर्त्विग्वरणतत्पूज
नमंडपप्रवेशतत्पूजनांते स्थापनात्पूर्वं आचार्यश्चतुरस्रपीठिकामध्ये कृतालवालोकयानेति पूजनं कृत्वा गुग्गुलधूपं दत्वा मूलवद्वृचतुरस्र
पीठिकोपरि यवगोधूमषष्टिककंगुश्यामाकतिलचीनकात्मकसप्तधान्यानि प्रक्षिप्य तेषु जलपूर्णान्सोपस्करान्ताम्रकलशान्स्थापयेत्॥ प्र
तिवृक्षं कलशस्थापनसेकादिकरणाशक्तौ वृक्षषष्ठे कर्त्तव्यमित्याहुः। ततोग्निस्थापनांते गुरुर्वेद्यां षोडशारे सूर्याद्यालोकपालांता देवता जला
शयोत्सर्गवत्संस्थाप्य। प्रतिवृक्षं सप्ताष्टौ वेति वृक्षसंख्याकानि स्वर्णफलानि वेद्यां कूर्ममकरादिपात्रीस्थानेवनस्पते वीड्वंगो हि भूया अस्मत्स
खा प्रतरणः सुवीरः॥ गोभिः संनद्धो असि वीडयस्वेति मंत्रेणासादयेत्॥ अस्य प्रजापतिर्वनस्पतिस्त्रिष्टुप्। वनस्पते वीड्वंगो॰। वीडयस्वास्थाता
ते जयतु जेत्वानि॥ ततो ब्रह्माणं शिवं विष्णुं विनायकं कमलामंबिकां भूतग्रामं चेति संस्थाप्य सर्वान्पूजयेत्॥ ततः सर्वेभ्यो बलीन्दत्वा पूर्वकुं
डात्प्राच्यां पदत्रयं भुवं त्यक्त्वा जलाशयोत्सववद्यूपं निखनेत्॥ ततः सर्वे आज्यभागांते वनस्पते इति मंत्रेणाष्टोत्तरशतमाज्याहुतीः पलाशस
मिधः कृष्णतिलाहुतीश्च जुहुयुः॥ ततो ग्रहादिविश्वकर्मांतेभ्योर्कादिसमिद्भिर्यवैः कृष्णतिलैश्च प्रत्येकमष्टाविंशतिसंख्याको होमः कार्यः। त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तःस्विष्टकृतएवमधिवासनांते।प्रातःकुंडसमीपस्थकलशजलैर्यजमानमभिषिंचेयुस्तर्प्पयेयुश्चततोयजमानःसोपस्करांगांउदङ्मुखीमुत्सृजे
त्तत्रमंत्रः॥इदंवनंपवित्रंकुरुष्वशुद्धंपूतममृतमस्तुनित्यंमांतारयंतीसर्वतीर्थाभिषेकंलोकाल्लोकंतरतेतीर्यतेति।एकवृक्षप्रतिष्ठायामिमंवृक्ष
मित्यूहः।ततःसमुद्रादूर्मिः।एवामीरोचनेदिवइतिमंत्रद्वयमुक्त्वागोपुच्छोदकेनदेवपितॄन्संतर्प्यसूयवसाद्भगवतीरितिहिंकृतंचहिंकृण्वतीरिति
चजपेत्॥ततोवनोत्सर्गंकुर्यादितिकेचित्॥सचैवंकुशयवतिलजलान्यादायेत्यादिइदंवनंअश्वत्थनिंबवटतिंतिणीकपित्थबिल्वामलकाम्रदाडि
मादिनानावृक्षयुतंवनस्पतिदेवताकंस्वीयसर्वपापक्षयपूर्वकमतीताऽनागतपितृकुलतारणकामोभगवत्प्रीतिकामोवासर्वसत्वेभ्योहमुत्सृजे।
ततऊहितंमंत्रद्वयंपठेत्॥सर्वभूतेभ्यउत्सृष्टंमयैतद्वनमूर्जितं।रमंतुसर्वभूतानिस्थितिमंतोत्सवादिभिः।सामान्यंसर्वभूतेभ्योमयादत्तमिदंवनं।
रमंतुसर्वभूतानिस्थितिभक्ष्योत्सवादिभिरिति॥ततोवृक्षमूलस्थापितजलैःपुनर्यजमानमभिषिच्यस्तर्पयेयुः तत्रवरुणमंत्राः।सुरास्त्वामित्या
दयश्च।ततोयजमानउपविश्याद्येहेत्यादिकृतैतदारामप्रतिष्ठाकर्मणःसमृद्ध्यर्थममुकगोत्रेभ्यएताःशतंगाअष्टषष्टिंपंचाशतंषट्त्रिंशतंपंचविं
शतिंवायथाशक्तिरुद्रदेवताःदक्षिणात्वेनयुष्मभ्यंगुर्वर्त्विग्भ्यःसंप्रददइतिदत्वाहेमसूत्रकटकांगुलीयकवासःशय्यापादुकाद्युपस्करान्ऋत्विग्भ्यो
शक्तौगुरवेदद्यात्।ततश्चापोहिष्ठेतितृचंजपन्नविच्छिन्नदुग्धधारयावनंनिष्परिषिच्यएकंविप्रंयथेष्टंदुग्धंपाययेत्।ततोगुरुर्लोकपालेभ्यःप्राग्व
द्बलिंदत्वा।दिनचतुष्टयंवृक्षमूलेषुक्षीराभिषेचनं।ग्रहादिपूजनमधिवासितदेवार्चनंवानस्पत्यहोमादिवैश्वकर्महोमांतंचकृत्वाचतुर्थदिनेहोमस
मापनांतेजलाशयोत्सर्गोक्तंचतुर्थीकर्मकुर्यात्।पूर्णाहुतिहोमोत्रवनस्पतिमंत्रेणेतिविशेषः।नात्रनागयष्टिः।नतीर्थप्रवेशनमितिरूपनारायणः।द्वय
मपिकार्यमित्यन्ये॥ततोभिषेकग्रहपूजाग्निपूजाविसर्ज्जनशय्यादानमंडपाद्युपस्करप्रतिपत्तिविप्रभोजनभूयसीदानकर्मेश्वरार्पणानिजलाशयोत्स

CC-0. In Public Domain. Digitization by eGangotri

उत्सर्गमयूखस्यसूचीपत्रम्

प्रकरण	प	पृ	प्र	प	पृ	प्र	प	पृ	प्र	प	पृ	प्र	प	पृ
मंगलाचरणं	१	२	तत्रमंडपः	३	१	सुवर्णकूर्ममकरादिकरणं	३	२	कूर्मादिप्रक्षेपः	४	२	जलाशयेष्वल्पतोये	१२	२
जलाशयोत्सर्गप्रशंसा	१	२	कुंडानि	३	१	वारुणमंडलं	३	२	पंचगव्यनिक्षेप	४	२	श्वमार्जारादिमृतौविधिः		
गृहादौकूपविशेषफलं	१	२	द्वाराणि	३	१	तत्रदेवताः	४	१	अत्रविशेषः	४	२	वृक्षारोपणं	१३	१
तत्कालाः	१	२	तत्रहोतारः	३	२	द्वारपालजपः	४	१	जलाशयोत्सर्गप्रयोगः	५	१	तत्प्रयोगः	१३	२
संक्रांतिभेदेनफलविशेषः	२	१	कलशाः	३	२	सप्तमृत्संचपल्लवकषाय (स्नानं	४	२	दक्षिणादानंतत्रप्रयो	९	२	इतिसूचीपत्रम्		
संक्षिप्तजलाशयोत्सर्गविधिः	२	२	यूपः	३	२	गोरुत्तारणं	४	२	चतुर्थीकर्म	११	१			
विस्तृतविधिः	३	१	कुंडानांखननं	३	२	जलाशयवेष्टनं	४	२	वापीकूपतडागोत्सर्गः	११	२			

उत्सर्गमयूखः समाप्तः

वाराणसीप्रसादस्यनियोगेनप्रयत्नतः काशीसंस्कृतमुद्रायामंविनियंशिलाक्षरैः ॥१॥ श्रीकाशीजीमेज्ञानवापीकेपूर्वफाटकपरश्रीविश्वनाथजीकेपास महाराजशिवलालदुबेजीकेमकानमेकाशीसंस्कृतयंत्रालयमेछपा० मि० फाल्गुणकृष्ण ५ सं० १९३५ ता: ११ माहे फरवरी सन् १८७९ ईसवी ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्सर्ग। मयूरव

द. न: १६१०१

मूल्य ७.२।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu